## ॥ श्री सीताकवचम् ॥
## Shri Sita Kavach

**॥ ॐ गण गणपतये नमः ॥**

**॥ अगस्तिरुवाच ॥**

सम्यक् पृष्टं त्वया वत्स सावधानमनाः श्रुणु ।
आदौ वक्ष्याम्यहं रम्यं सीतायाः कवचं शुभम् ॥१॥

या सीतावनि संभवाथमिथिलापालेन संवर्धितापद्माक्षनृपतेः
सुता नलगता या मातुलिङ्गोत्भवा।
या रत्ने लयमागता जलनिधौ या वेद वारं गतालङ्कां
सा मृगलोचना शशिमुखी मांपातु रामप्रिया ॥२॥

**॥ अथ न्यासः ॥**

अस्य श्री सीताकवच मन्त्रस्य अगस्ति ऋषिः ।
श्री सीता देवता ।अनुष्टुप् छन्दः ।रमेति बीजम् ।
जनकजेति शक्तिः ऽवनिजेति कीलकम् ।
पद्माक्ष सुतेत्यस्त्रम् ।मातुलिङ्गीति कवचम् ।
मूलकासुर घातिनीति मन्त्रः ।
श्रीसीतारामचन्द्र प्रीत्यर्थं सकल
कामना सिद्ध्यर्थं जपे विनियोगः ॥

**॥ अथ अङ्गुळी न्यासः ॥**

ॐ ह्रां सीतायै अङ्गुष्ठाभ्यां नमः ।
ॐ ह्रीं रमायै तर्जनीभ्यां नमः ।
ॐ ह्रूं जनकजायै मध्यमाभ्यां नमः ।
ॐ ह्रैं अवनिजायै अनामिकाभ्यां नमः ।
ॐ ह्रौं पद्माक्षसुतायै कनिष्ठिकाभ्यां नमः ।
ॐ ह्रः मातुलिङ्ग्यै करतल करपृष्ठाभ्यां नमः ॥

**॥ हृदयादिन्यासः ॥**

ॐ ह्रां सीतायै हृदयाय नमः ।
ॐ ह्रीं रमायै शिरसे स्वाहा ।
ॐ ह्रूं जनकजायै शिकायै वषट् ।
ॐ ह्रैं अवनिजायै कवचाय हुम् ।
ॐ ह्रौं पद्माक्षसुतायै नेत्रत्रयाय वौषट् ।
ॐ ह्रः मातुलिङ्ग्यै अस्त्राय फट् ।
भूर्भुवःसुवरोमिति दिग्बन्धः ॥

**॥ अथ ध्यानम् ॥**

सीतां कमलपत्राक्षीं विद्युत्पुञ्च समप्रभाम् ।
द्विभुजां सुकुमाराङ्गीं पीतकौसेय वासिनीम् ॥१॥
सिंहासने रामचन्द्र वामभाग स्थितां वराम् ।
नानालङ्कार सम्युक्तां कुण्डलद्वय धारिणीम् ॥२॥

चूडाकङ्कण केयूर रशना नूपुरान्विताम् ।
सीमन्ते रविचन्द्राभ्यां निटिले तिलकेन च ॥३॥
मयूरा भरणेनापि घ्राणेति शोभितांशुभाम् ।
हरिद्रां कज्जलं दिव्यं कुङ्कुमं कुसुमानि च ॥४॥

बिभ्रन्तीं सुरभिद्रव्यं सगन्ध स्नेह मुत्तमम् ।
स्मिताननां गौरवर्णां मन्दार कुसुमं करे ॥५॥
बिभ्रन्ती मपरे हस्ते मातुलिङ्ग मनुत्तमम् ।
रम्यवासां च बिम्बोष्ठीं चन्द्र वाहन लोचनाम् ॥६॥

कलानाथ समानास्यां कलकण्ठ मनोरमाम् ।
मातुलिङ्गोत्भवां देवीं पद्माक्षदुहितां शुभाम् ॥७॥
मैथिलीं रामदयितां दासीभिः परिवीजिताम् ।
एवं ध्यात्वा जनकजां हेमकुंभ पयोधरां ॥८॥

सीतायाः कवचं दिव्यं पठनीयं सुभावहं ॥९॥

ॐ ।श्री सीता पूर्वतः पातु दक्षिणेवतु जानकी ।
प्रतीच्यां पातु वैदेही पातूदीच्यां च मैथिली ॥१॥
अधः पातु मातुलिङ्गी ऊर्ध्वं पद्माक्षजावतु ।
मध्येवनिसुता पातु सर्वतः पातु मां रमा ॥२॥

स्मितानना शिरः पातु पातु भालं नृपात्मजा ।
पद्मावतु भृवोर्मध्ये मृगाक्षी नयनेवतु ॥३॥
कपोले कर्णमूले च पातु श्रीराम वल्लभा ।
नासाग्रं सात्विकी पातु पातु वक्त्रं तु राजसी ॥४॥

तामसी पातु मद्वाणीं पातु जिह्वां पतिव्रता ।
दन्तान् पातु महामाया चिबुकं कनकप्रभा ॥५॥
पातु कण्ठं सौम्यरूपा स्कन्धौ पातु सुरार्चिता ।
भुजौ पातु वरारोहा करौ कङ्कण मण्डिता ॥६॥

नखान् रक्तनखा पातु कुक्षौ पातु लघूदरा ।
वक्षः पातु रामपत्नी पार्श्वे रावणमोहिनी ॥७॥
पृष्ठदेशे वह्निगुप्ता वतु मां सर्वदैव हि ।
दिव्यप्रदा पातु नाभिं कटिं राक्षस मोहिनी ॥८॥

गुह्यं पातु रत्नगुप्ता लिङ्गं पातु हरिप्रिया ।
ऊरू रक्षतु रंभोरूः जानुनी प्रिय भाषिणी ॥९॥
जङ्घे पातु सदा सुभ्रूः गुल्फौ चामरवीजिता ।
पादौ लवसुता पातु पात्वङ्गानि कुशाम्बिका ॥१०॥

पादाङ्गुळीः सदा पातु मम नूपुर निस्वना ।
रोमाण्यवतु मे नित्यं पीतकौशेयवासिनी ॥११॥
रात्रौ पातु कालरूपा दिने दानैक तत्परा ।
सर्वकालेषु मां पातु मूलकासुरघातिनी ॥१२॥

एवं सुतीक्ष्ण सीतायाः कवचं ते मयेरितम् ।

इदं प्रातः समुत्थाय स्नात्वा नित्यं पठेत्तुयः ॥१३॥
जानकीं पूजयित्वा स सर्वान् कामानवाप्नुयात् ।
धनार्थी प्राप्नुयाद्द्रव्यं पुत्रार्थी पुत्रमाप्नुयात् ॥१४॥

स्त्रीकामार्थी शुभां नारीं सुखार्थि सौख्य माप्नुयात् ।
अष्टवारं जपनीयं सीतायाः कवचं सदा ॥१५॥
अष्टभूसुर सीतायै नरै प्रीत्यार्पयेत् सदा ।
फलपुष्पादि कादीनि यानि यानि पृथक् पृथक् ॥१६॥

सीतायाः कवचं चेदं पुण्यं पातक नाशनम् ।
ये पठन्ति नरा भक्त्या ते धन्या मानवा भुवि ॥१७॥
पठन्ति रामकवचं सीतायाः कवचं विना ।
तथा विना लक्ष्मणस्य कवचेन वृथा स्मृतम् ॥१८॥

तस्मात् सदा नरैर् जाप्यं कवचानां चतुष्टयम् ।
आदौ तु वायुपुत्रस्य लक्ष्मणस्य ततः परम् ॥१९॥
ततः पटेच्च सीतायाः श्रीरामस्य ततः परम् ।
एवं सदा जपनीयं कवचानां चतुष्टयम् ॥२०॥

**॥ इति श्री सीता कवचं सम्पूर्णम् ॥**